# 20 - विंश दशकम्

## ऋषभ योगीश्वर चरितम्

प्रियव्रतस्य प्रिय पुत्र भूतात् आग्नीध्र राजा दुदितो हि नाभिः ।
त्वां दृष्ट्वा निष्ट दमिष्टि मध्ये तवैव तुष्ट्यै कृत यज्ञ कर्मा ॥ ॥20-1॥

अभिष्टुतस् तत्र मुनीश्वरैस् त्वं राज्ञस् स्वतुल्यं सुत मर्थ्यमानः ।
स्वयं जनिष्येऽह मिति ब्रुवाणः तिरोदधा बर्हिषि विश्वमूर्ते ॥ ॥20-2॥

नाभि प्रियायाम् अथ मेरु देव्यां त्व मंशतोऽभूर् ऋषभाभिधानः ।
अलोक सामान्य गुण प्रभाव प्रभावि ताशेष जन प्रमोदः ॥ ॥20-3॥

त्वयि त्रिलोकी भृति राज्यभारं निधाय नाभिस् सह मेरु देव्या ।
तपोवनं प्राप्य भवन् निषेवी गतः किलानन्द पदं पदं ते ॥ ॥20-4॥

इन्द्रस् त्वदुत्कर्ष कृता दमर्षात् ववर्ष नास्मिन् नजनाभवर्षे ।
यदा तदात्वं निजयोग शक्त्या स्ववर्ष मेनद् व्यदधास् सुवर्षम् ॥ ॥20-5॥

जितेन्द्र दत्तां कमनीं जयन्तीम् अथोद्वहन् नात्म रताशयोऽपि ।
अजीजनस् तत्र शतं तनूजान् एषां क्षितीशो भरतोऽग्र जन्मा ॥ ॥20-6॥

नवाभवन् योगिवरा नवान्येतु अपालयन् भारत वर्ष खण्डान् ।
सैका त्वशीतिस् तव शेष पुत्राः तपो बलात् भूसुर भूयमीयुः ॥ ॥20-7॥

उक्त्वा सुतेभ्योऽथ मुनीन्द्र मध्ये विरक्ति भक्त्यन्वित मुक्ति मार्गम् ।
स्वयं गतः पारमहंस्य वृत्तिम् अधा जडोन्मत्त पिशाच चर्याम् ॥ ॥20-8॥

परात्म भूतोऽपि परोपदेशं कुर्वन् भवान् सर्व निरस्यमानः ।
विकार हीनो विचचार कृत्स्नां मही महीनात्म रसाभि लीनः ॥ ॥20-9॥

शयुव्रतं गो मृग काक चर्यां चिरं चरन् नाप्य परं स्वरूपं ।
दवा हृताङ्गः कुटकाचले त्वं तापान् ममापा कुरु वातनाथ ॥॥20-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥